CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.S.

Coll. No. 128.

Title GARBHADHANADISIMANTONNAYANAM.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 128 Subject: Dharmaśāstra

Title: [illegible]

Author: — Scribe: Karunāśankar

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 8¼" x 4.6" Extent: 11 foll.

Language: Sanskrit Script: Devanagari

Remarks: Complete.

॥ श्रीगणेशाय नमः ॥ अथ गर्भाधानं । पुंसवनं । गर्भरक्षणं । सीमंतोन्न
यनं च । एतानि एकतंत्रेण क्रियंते । अद्य श्री० देशे च वर्तमानस्य पत्न्याः
गर्भसंस्कारार्थं शास्त्रोक्त० गर्भाधानादि सीमं० नोन्नयनपर्यंता
नि कर्माणि एकतंत्रेण अहं करिष्ये ॥ स्वस्ति नो मिमीताम् संगमेन ॥ पंच
भूसंस्कारः । समूह्य १ उपलिप्य २ उल्लिख्य ३ उद्धृत्य ४ अभ्युक्ष्य ५ । अ
ग्निमुपसमाधाय । अग्निं प्रणयामि मनसा० चतुष्पदे परिसमूहनं ३
पर्युक्ष्य ३ आघाटकं ४ द[illegible]क्षिणतो ब्रह्मासनं । उत्तरतः प्रणी
तासनं । आत्मासनं च । अग्नेर्दक्षिणतो ब्रह्मस्थापनं । चतुर्वःस्व ३

रि निधाय निष्ठापनं । पुष्पैरर्चनं । उत्तरतः प्रणीताः प्रणयनं । को वः प्र
णयतीति प्रणयनं । दक्षिणजान्वाच्य स्तरणं । प्रादेशेन मापयि
त्वा कुशेन छिनत्ति । पवित्रे स्थो वैष्णव्यौ इति पवित्रच्छेदनं
विक्षव्या वित्य । स्रुवस्रुगं कुशान् करणान्यासाद्य त्रिः पर्युक्ष्य । मध्ये
नोपयोसीत्याज्यस्थालीमादाय । इषे त्वेत्यधिश्रित्य । स्रुवः
प्रतपनं । संमार्गः । पुनः प्रतपनं । प्रोक्षणं स्रुचः संमार्गः । प्रतप
नं प्रोक्षणं । मेक्षणं च संमार्गः । प्रतपनं प्रोक्षणं । ऊर्जे त्वेत्या
ज्यमुदगुद्वास्य । प्रागग्रे स्कवेत्फदकं दत्वा । स । वितुष्ट्वा प्रसव

।उत्पुनाम्यच्छिद्रेणपवित्रेणवसोः सूर्यस्य रश्मिभिः। आज्यसं
स्कारः। सवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोः सूर्यस्य
रश्मिभिः। उदकसंस्कारः। तेनोदकेनप्रथमगर्भरक्षणं। चरु
ग्रहणं। रक्षोहाग्नयेजुष्टं गृह्णामि। प्रथमः। द्वितीयः। तृतीयः। च
तुर्थं तूष्णीं। रक्षोहाग्नयेजुष्टमासादयामि। आसादनं। ततःसी
मंतोन्नयनचरुग्रहणं। धात्रे लिंगोक्तदेवताभ्यः प्रजापत
येजुष्टं गृह्णामि। प्रथमः। ३ चतुर्थं तूष्णीं। धात्रे लि० जुष्टमासा
दयामि। आसादनं। रक्षोहाग्नये त्वाजुष्टं प्रक्षा। क्षामि। धात्रे 2

लि० जुष्टं प्रोक्षामि। समिदादिकं प्रोक्ष्य। शेषोदकं प्रणीतासु
मुत्का। उभयोः त्रिः प्रक्षालनं। उभयोः अधिश्रयणं। उभयोः
शृतानिधारणं। उभयोः उदगुद्वासनं। शृतानां उत्तरपूर्वेण
उत्त। सितानां उपस्तनुः। उभयोः पार्श्वप्रक्षालनं। उभयोः प्र
त्यभिधारणं। समस्तद्रव्यासमिद्धोजुहुयात्। विश्वोर्हस्तोसीति
ऊरास्कवयोग्रहणं। त्वमग्नेद्विरायस्पोषे। भिर्जगती। त्व
मग्नेप्रमतिस्त्वंपितासिनस्त्वंवयस्कृत्तवजामयोवयं। सं
त्वारायःशतिनःसंसहस्त्रिणः सुवीरंयंतिव्रतपामदाभ्या। स्वाहा।

उत्तरपश्चार्धान्नाहोमः।दक्षिणपश्चार्धान्तू होमः।इदमग्नयेनम
म।यस्येमे हिरण्यगर्भः कस्त्रिष्टुप।यस्येमे हिमवन्तो महित्वाय
स्य समुद्रं रसया सहाहुः।यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हवि
षा विधेम।स्वाहा इदं कामयेनमम॥अग्नये स्वाहा उत्तरतः।इदमग्न
येनमम।सोमाय स्वाहा दक्षिणतः।इदं सोमायनमम।मध्ये च्याहु
तयः।ततः गर्भाधानकर्मा नां स्त्रियां स्नातां अहतशुक्लवस्त्रां वृ
द्धिसमिपे स्वदक्षिणविभागे उपविश्य ततः।गर्भाधानाकर्मणः
कालातिक्रमे दोषनिवृत्त्यर्थं सर्वप्रायश्चित्तं करिष्ये॥भूर्भुवः ३

स्वः स्वाहा॥आयासाग्ने॰नषजं स्वाहा॥ततः पुरस्तात् ॐ भूः स्वाहा
ॐ भुवः स्वाहा।स्वः स्वाहा।ॐ भूर्भुवः स्वः स्वाहा।इति हुत्वा।ॐ
अध्यांजपतिफूली निरस्याः मूलपेषयित्वा तस्य रसं दक्षि
णनासिका मध्ये उदीर्ष्वातइति द्वाभ्यां मंत्राभ्यां अंते स्वाहाकं
रान्याहि निषिंचेत्।मंत्र।उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं
नमगीर्भिरीजे।अन्यामिछपितृषदं व्यक्तां स तेभागो जनुषा
तस्य विद्धि स्वाहा॥इति मंत्रेण नासिकायां रसं निनयेत्॥पु
नः।उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा।अन्यामिछप्रफ

र्वं रसीजायांपत्यासृज॥ अन्वद्ध रान्नज वः संतुपंथायेभिः स
खायोयंतिनोवरेयं।स्वाहा॥ इतिमंत्राभ्यांनिनयेत्।ततः गं
धर्वस्य विश्वावसोर्मुखमसि। इतिमंत्रेण दक्षिणहस्तेन स्त्रियाः
योनिप्रदेशं ४ हस्तेन स्पर्शेत्। प्राणेनैरेनोदथा[redacted]वि्व्यकुशा
मि। अमुकसगोत्रेअमुकीदेविदेइत्युक्त्वातां अवजिघ्रेत्उ
छासंनिक्षिपेत् दित्यर्थः॥ ततः उपरिष्टात् ॐभूः स्वाहा। ॐभुवः
स्वाहा। ॐस्वः स्वाहा। ॐभूर्भुवः स्वः स्वाहा। अथपुंसवनं। ततः
पुंसवनकर्मणः कालमतिक्रामदोषनिहृत्यर्थं सर्वप्रायश्चि ४

त्तमहं करिष्ये। ॐभूर्भुवः स्वः स्वाहा। अयाश्चाग्ने॰ भेषजं स्वाहा
पुरस्तात्। ४ वटवृक्षस्यशुंगांशुंपेषयित्वानद्यसअर्घपात्रेकृ
त्वा स्त्रियाः दक्षिणेनासिकेछिद्रेनिनयेत्। चतुर्वार॥ अग्निना
रयिमश्नवत्पोषमेवदिवेदिवे॥ यशसंवीरवत्तमं॥ स्वाहा॥
ॐननस्करीपमध्यपोषयित्नुदेवत्वष्टर्विरराणस्यस्व॥ यतोवी
रः कर्मण्यः सुदक्षोयुक्तग्रावाजायतेदेवकामः। स्वाहा॥ ॐस
मिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रा [redacted]जायतेदेवकाममवाजा

सुनसो मोज्जराने। ग्रावाणोयस्येषिरं वदंत्ययध्रुयुऽविषावसिं
धुं॥ स्वाहा॥ ॐ पिशंगरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते दे
वकामः॥ प्रजां त्वष्टा विष्यतु नाभिमस्मेऽथा देवानामप्येतु
पाथः॥ स्वाहा॥ ततः उपरिष्टात् ४। इति पुंसवनसमाप्तं॥ अथ ग
र्भरक्षणं। गर्भरक्षणकर्मणः कालामतिक्रमदोषनिवृत्त्यर्थं स
र्वप्रायश्चित्तमहं करिष्ये। भूर्भुवः स्व स्वाहा। अयाश्चाग्ने
स्यनभिशस्तिश्च सत्यमित्त्वमया असि॥ अयासामनसाहतो ५

यासऽव्यमोहिषे॥ अयानः शगुहि भेषजं स्वाहा॥ ततश्चरुहो
मः॥ स्रुचि एकस्रुवः। चरुअवदाने उपरिस्रुव १। एवं स्रुचि
मध्ये चतुर्थ हीनकरणं। पंचस्रुव प्रवरोयदितदा अवदानत्रयं॥
ततः ज्ञाताभ्यंगः॥ एवं चरुहोमः॥ ब्रह्मणाग्निः संविदानो रक्षो
हा बाधतामितः॥ अमीवा यस्ते गर्भं दुर्णामा योनिमाशये स्वाहा॥
यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह नि
ष्क्रव्यादमनीनशत्। स्वाहा॥ यस्ते हंति पतयंतं निषत्स्नुं यः स

सरीसृपं। जातं यस्ते जिघांसति तमितो नाशयामसि। स्वाहा॥ य
स्त ऊरू विहरत्यंतरा दंपती शये॥ योनिं यो अंतरारेळ्हि तमि
तो नाशयामसि। स्वाहा॥ यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा नि
पद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि। स्वाहा॥ य
स्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते जिघांसति तमि
तो नाशयामसि। स्वाहा॥ कृनशोषं ऋाग्न्यं शृङीत्वा। अक्षीभ्यां ते
नासिकाभ्यां कर्णाभ्यां छुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जि ६

ह्वाया विवृहामि ते॥ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्या
त्। यक्ष्मं दोषण्य१ंसाभ्यां बाहुभ्यां विवृहामि ते॥ आंत्रेभ्यः
स्ते गुदाभ्यो वनिष्ठोर्हृदयादधि॥ यक्ष्मं मतस्नाभ्यां यक्नः प्लाशि
भ्यो विवृहामि ते॥ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां
॥ यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि ते॥ मेहनाद्वनंक
रणाल्लोमभ्यस्ते नखेभ्यः॥ यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहा
मि ते॥ अंगादंगाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि॥ यक्ष्मं सर्वस्मा

दात्मनस्त्वमिदं विद्दहामि ते ॥ तेन घृतेन पत्न्याः सर्वशरीराभ्यंगः ॥
सीमंतकर्म ॥ स्त्रीमन्वारंभते ॥ नानाहोमः ॥ महाव्याः
हृति ४ स्रुवेणाघृनहोमः ॥ ततः सीमंतचरुहोमः ॥ आकूति
ह चतुर्गृहीतधर्मेण ॥ मंत्राः ॥ ॐ धातादधातु दाशुषे प्रा
चीं जीवातुमक्षितिं ॥ वयं देवस्य धीमहि सुमतिं सत्यधर्मणः
स्वाहा ॥ ॐ धाता प्रजाया उत राय ईशे ॰नुहोन स्वाहा ॥ रने
जमेषपरापत सुपुत्रः पुनरापत ॥ अस्यै मे पुत्रकामायै गर्भमा ७

धेहि यः पुमान् स्वाहा ॥ यथेयं पृथिवी मह्यं उत्ताना गर्भमादधे ॥ एवं
नं गर्भमाधेहि दशमे मासि सूतवे ॥ स्वाहा ॥ विष्णोः श्रेष्ठेन रूपेण
स्यां नार्यां गवीन्यां ॥ पुमांसं पुत्रमाधेहि दशमे मासि सूतवे ॥ स्वा
हा ॥ ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ॥
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥ स्वाहा
एवं आकूति हवनं ॥ शीर्षोन्नीयं ॥ शान्नीं गृहीत्वा उदुंबरफल
हारेण सह नाभिं आरभ्य मस्तक मध्यं यावत् रेखां कुर्यात् ॥

तूष्णीं॥नतः॥ॐ भूर्भुवः स्वः उत्संगे हारं निधाय॥कंठे परिधा
य॥हाराभिमंत्रणं॥ॐ अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भ
व॥इति॥राज्ञानं संगायन॥उदकपात्रमध्ये यवान्प्रक्षिप्य पाय
येत्॥वार ३॥ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु॥आ
सिंचतु प्रजापतिर्धाता गर्भं दधातु ते स्वाहा॥१॥ॐ राकामहं सुहवां सु
ष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना॥सीव्यत्वपः सूच्याछिद्य
मानया ददातु वीरं शतदायमुक्थ्यं॥स्वाहा॥यास्ते राके सुमतयः ८

सुपेशसो याभिर्ददासि दाशुषे वसूनि॥ताभिर्नो अद्य सुमना उ
पागहि सहस्रपोषं सुभगे रराणा॥स्वाहा॥सिनीवालि पृथुष्टुके
या देवानामसि स्वसा॥जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि
नः॥स्वाहा॥या सुबाहुः स्वंगुरिः सुषूमा बहुसूवरी॥तस्यै विश्प
त्न्यै हविः सिनीवाल्यै जुहोतन॥स्वाहा॥या गुंगूर्या सिनीवाली
या राका या सरस्वती॥इंद्राणीमह्व ऊतये वरुणानीं स्वस्तये॥
स्वाहा॥अग्नेपि तमरुतां सुम्नमेतु मानः सूर्यस्य संदृशो युयोथाः॥

अग्निनावीरोअर्वंतिद्धमेनप्रजायेमहिरुढप्रजानिः॥स्वाहा॥
नैसम्प्तिमीहे॥सप्तवाद्यहअद्गनोदकेनत्रीणांस्त्रियांवेत्ते॥अ
थास्याउदरंनिमृशेत्॥सुपर्णोसिगरुत्मांस्त्रिवृत्तेशिरोगायत्रंच
क्षुः॥छंदांस्यंगानियजूंषिनामसामतेतनूः॥इतिमंत्रेण॥मोद
मानीगायेयेमहाहेमवतीवा॥वृषनोदक्षिणा॥पुण्याहंदीर्घमि
त्युक्तांतिर्भवतु॥अस्यसीमंतोन्नयनकर्मणःप्रतिष्ठासिध्यर्थंवृ
षनोदक्षिणां॥तुभ्यमहंसंप्रददे॥ततःशिष्टिस्ततः॥स्कं.१॥उ ६

नयोःश्चवौः।एकैकमवदानं।उपरिष्टद्वौ।नक्षत्राण्यंगः।अग्नये
स्विष्टकृतेस्वाहा।इदमग्नयेस्विष्टकृतेनमम॥उदकं०नं॥सप्तर्के
।न्व०तु०स्व०।नर्तुवस्त्व०२॥अयाश्चाग्ने०नंस्वाहा॥प्रजापतये०
।पुण्याहंदीर्घमित्यादि।शुभांतिर्भवतु॥गर्भाधानादिसीमंतोन्न
यनपर्यंतकर्मणःप्रतिष्ठासिध्यर्थंहिरण्यनिष्क्रयेयथादास्यमानं
द्रव्यंकर्मांगदेवताप्रीत्यर्थंनानागोत्रेभ्योब्राह्मणेभ्योअहंसंप्र
दास्ये॥भगवत्यःकर्मांगदेवताप्रीयतां॥उपग्रहविमोचनं॥स्क

च्यग्रं मध्यं स्रुवे मूलमाज्यस्थाल्यां तान प्रकृत्य अग्रेर्वासोसी । निहो
मः ॥ तिस्रः समिधोनुकुर्यात् ॥ यथोक्तं पर्युक्षणं ॥ इदमापः ह्वेन
मार्जनं । पवित्रे अग्नौ प्रक्षिप्य ॥ बर्हिर्होमः ॥ मांगल्यं आशीर्वादः ॥
प्रणीताविमोकः ॥ ब्रह्मणे पूर्णपात्रं अमीषां कर्मणां प्रतिष्ठासि
ध्यर्थं यथासंपन्नेनान्नेन तृप्तिपर्यंतेन भोजनेन ब्रा० ष्ये ॥ भगवतः
कर्मांगदेवताप्रीयतां ॥ शं नः पंचो नाशांतिः ॥ त्रयोवै यज्ञे कामाय
संपन्ने० नाप्नोति । अमीषां कर्म० परिपूर्णमस्तु ॥ गृहे० उत्तरे० चतु० १०

नमः ॥ गर्भाधानादिसीमंतोन्नयनं समाप्तं ॥ ॥ ॥ शुभं भवतु ॥
कल्याणमस्तु ॥ ॥ पं । करुणाशंकरेण लिखितं ॥ इदं पुस्तकं ॥
आसादनि । बर्हिः । प्रणीता । पवित्रे २ ब्रह्मा २ आज्यं । धान्यं चरु २ ॥
स्थालि । स्रुक् । स्रुवः । मेक्षणं । अपक्व फलोदुंबर फलानां स्त
त्रयीथितानं द्वारः ॥ शीशोलिपुं ॥ चुंश्चामलीनुं रस । वटनीडी
रीनुं रस ॥ कर्मारंभः ॥ आचमनं । प्राणायामः ॥ अद्येत्यादि० ॥

११